National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2019; 1(23): 73-75
© 2019 NJHSR
www.sanskritarticle.com

**Vasudevan Namboodiri P K**
Part Time Research Scholar,
Department Of Vyakarana,
Sree Sankaracharya University Of
Sanskrit Main Centre, Kalady,
Kerala

**Correspondence:**
**Vasudevan Namboodiri P K**
Part Time Research Scholar,
Department Of Vyakarana,
Sree Sankaracharya University Of
Sanskrit, Main Centre, Kalady,
Kerala

# शाब्दबोधसहकारिकारणनिरूपणम्

**Vasudevan Namboodiri P K**

## उपोद्घातः

भारतीयसंस्कृतिः वेदान्तर्भूता भवति। अतः एव वेदाङ्गानां प्रामुख्यं च। वेदाङ्गेषु व्याकरणस्य एव प्राधान्यं कल्पितं दृश्यते। भारते विद्यमानासु व्याकरणपद्धतिषु पाणिनीयव्याकरणस्यैव प्रामुख्यम्। एवं पाणिनिना कृतायाम् अष्टाध्याय्यां सूत्ररूपेण शास्त्रकार्याणि उक्तानि। "एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः" इत्यादिना महाभाष्यवचनेन परमपदप्राप्त्यर्थं ज्ञानपूर्वकप्रयोगः एव कर्तव्यः इत्युच्यते। अर्थात् साध्वसाधुज्ञानेनेति। एवं यः शब्दः साधुः यो असाधुरिति व्याकरणेन विज्ञाय साधुशब्दप्रयोगेन वैयाकरणैः मोक्षः प्राप्यते। अत्र किं नाम शब्दः? कथं शब्दात् अर्थः? इत्यादयः संशयाः भवन्त्येव। अत्र शाब्दबोधे शक्त्यादिवृत्तिज्ञानमेव मुख्यं कारणमिति वैयाकरणानां मतम्। तैः वाक्यस्फोटस्यैव मुख्यं वाचकत्वं कल्पितं दृश्यते। शब्दात् जन्यः बोधः एव शाब्दबोधः। अर्थात् शब्दजन्यः अन्वितबोधः अनन्वितबोधो वा शाब्दबोधः इति।

एवं विद्यमानः शाब्दबोधः द्विविधः भवति पदजन्य - वाक्यजन्यभेदेन। पदज्ञानं, पदार्थज्ञानम्, अर्थज्ञानं च अनन्वितबोधरूपस्य पदजन्यशाब्दबोधस्य मुख्यकारणानि भवन्ति। तथा वाक्यार्थरूपान्वितरूपस्य शाब्दबोधस्यापि पदज्ञानमेव मुख्यकारणमिति तात्पर्यम्। एवं मुख्यकारणेनैव कार्यजनकत्वे सति तद्भिन्नरूपेण विद्यमानानि सहकारिकारणान्यपि शाब्दबोधाय अपेक्षितानि इति वैयाकरणानां मतम्। एवं वाक्यार्थरूपान्वितरूपस्य शाब्दस्य सहकारिकारणानि भवन्ति आकाङ्क्षा-योग्यता-आसत्तिः-तात्पर्याणि। इह प्रबन्धेऽस्मिन् महामहोपाध्यायेन आचार्येण नागेशभट्टेन परमलघुमञ्जूषायाम् उक्तरीत्या सहकारिकारणानि निरूप्यन्ते।

## आकाङ्क्षा

"वाक्यसमयग्राहिका आकाङ्क्षा"[1] इति आचार्यस्य नागेशस्याभिप्रायः। अर्थात् वाक्यस्य निश्चयग्राहक-विषयकबोधस्य जनिका आकाङ्क्षा इति। एवं घटः इत्यादि एकपदार्थज्ञाने तदर्थज्ञानेन हेतुना घटाद्यर्थेषु अन्वययोग्यस्य अन्यस्य अनुक्तस्य तत्सम्बन्धस्य योग्यस्य अर्थस्य यत् ज्ञानं कारकादिशास्त्रज्ञानयुक्तस्य विवेकिनः पुरुषस्य बुद्धौ तज्ज्ञानेन अन्वितार्थविषयकरूपेण इच्छारूपेण विलसति सा एव आकाङ्क्षा इति। एवं चेतनात्मिका आकाङ्क्षा पुरुषीया इत्यतः पुरुषनिष्ठायाः अर्थात् पुरुषेच्छायाः आकाङ्क्षायाः आकाङ्क्षाविषये अर्थे आरोपः इति तात्पर्यम्। कारणं तु अयमर्थः अर्थान्तरं प्रति अन्वेतुम् इच्छति आकाङ्क्षति इति व्यवहारः। एवमर्थे आकाङ्क्षायाः आरोपितत्वमेव अभिधानस्य अपरिसमाप्तिः अथवा अन्वयबोधजनकत्वेन विद्यमाना पुरुषेच्छा इति सिद्ध्यति।

अत्र तार्किकैः पदे आकाङ्क्षा आरोप्यते। तत्तु आचार्येण नागेशभट्टेन निराकरोत्येवम् - "पदे तु नारोपः, अर्थबोधोत्तरमेवाकाङ्क्षोदयात्"[2] इत्यादिना। एवं एकपदार्थस्य ज्ञानस्य सम्भवानन्तरमेव तदर्थान्वयविषयिण्याः आकाङ्क्षायाः उदयः इत्यतः पदे अस्याः आरोपः न करणीयः अर्थे एवारोपः शक्तः इत्यर्थलाभः। पदश्रवणानन्तरमेव अर्थज्ञानमित्यतः अर्थज्ञानात्

पूर्वमेव पदे अस्याः आरोपः न समीचीनमिति आचार्यस्य मतम्। पदं साकाङ्क्षम् इत्यादि वचनेषु साकाङ्क्षार्थबोधकं भवति पदम् इति भाष्यकारमतम्। तदुक्तं च भाष्ये "समर्थः पदविधिः' इति सूत्रव्याख्याने "परस्मरव्यपेक्षां सामर्थ्यमित्येके"[3] इत्यादिना। शब्दस्य आकाङ्क्षा व्यपेक्षा इत्यर्थः। एवं परस्पराकाङ्क्षा सामथ्र्यमिति केषाञ्चन आचार्याणां मतमित्यर्थः। एकार्थीभावरूपेण व्यपेक्षारूपेण च सामर्थ्यं द्विविधं वर्तते। पञ्चवृत्तिषु एव एकार्थीभावसामर्थ्यं दृश्यते। व्यपेक्षा सामर्थ्यं तु वाक्येषु च।

विशिष्टा अपेक्षा अथवा बन्धः व्यपेक्षा। एवं परस्परव्यपेक्षा इत्यस्य परस्पराकाङ्क्षा इत्यर्थः। एवं विद्यमाना आकाङ्क्षा अर्थयोरिति भाष्यकारमतम्। तदुच्यते भाष्ये - "परस्परव्यपेक्षां सामर्थ्यमित्येके। का पुनशशब्दयोर्व्यपेक्षा? न ब्रूमशशब्दयोरिति। किं तर्हि अर्थयोरिति।" एवम् ईदृशजिज्ञासोत्थापकं ज्ञानं च एकस्य पदस्य अर्थबोधे ज्ञाते सति व्यतिरिक्तस्य अप्रयुक्तस्य योग्यस्य अपरपदार्थस्य अन्वयबोधस्य अजनकत्वम् अस्ति इति यत् ज्ञानं तत् तस्य पदस्य आकाङ्क्षात्वम्। अर्थात् घाटादिपदानां अर्थबोधे ज्ञाते सति तद्भिन्नस्य "आनय" इत्यादि अप्रयुक्तस्य योग्यस्य अपरपदार्थस्य अन्वयबोधस्य अजनकत्वम् अस्ति इति ज्ञानमेव घाटादिपदानामाकाङ्क्षत्वम् इति। अतः एव घटार्थविषये तादृशस्य अन्वयबोधस्य अजनकत्वे आनयेत्यादिपदार्थाभावे अपि आकाङ्क्षा इति व्यवहारः च। एवं पुरुषीयाम् इच्छाम् अचेतनेषु अर्थेषु आरोपति इत्यत्र विद्यमानस्य अनौचित्यस्य परिहाराय उच्यते आचार्येण नागेशभट्टेन "यद्वा उत्थापकताविषयान्यतरसम्बन्धेनोभय - सम्बन्धेन वा अर्थान्तरजिज्ञासा आकाङ्क्षा"[4] इति। अनेन आचार्यस्य नागेशस्य मते उत्थापकतासम्बन्धेन विषयतासम्बन्धेन तदुभयसम्बन्धेन च आकाङ्क्षा त्रिधा भासते इति ज्ञातुं शक्यते। यथा पश्य मृगो धावति इत्यादिषु पश्य इति दर्शनक्रियार्थस्य किमिति कर्मकारकोत्थापकरूपजिज्ञासायां मृगकर्तृकधावनक्रियारूपं कर्म इति यत् आकाङ्क्षापूरणसामर्थ्यं तदेव तस्य उत्थापकता सामर्थ्यं च।

एवं पश्य इत्यादिषु विद्यमाना आकाङ्क्षा उत्थापकतासम्बन्धविशिष्टा इति ज्ञेया। धावनं तु दर्शनक्रियाविषयीभूतम् इत्यतः धावनक्रिया विषयतासम्बन्धविशिष्टया आकाङ्क्षया दर्शनर्कियां प्रति अन्वेतुम् इच्छति। तथा पचति तण्डुलं देवदत्त इत्यादौ पचति तण्डुलम् इति क्रियाकारकयोः द्वयोरपि आकाङ्क्षोत्थापकत्वात् आकाङ्क्षाविषयत्वात् च उभयसम्बन्धरूपा आकाङ्क्षा इति आचार्यस्य नागेशभट्टस्याभिप्रायः। एतदेव वैयाकरणानां परमसिद्धान्तभूतः अभिप्रायश्च। एवं पूर्वोक्तसम्बन्धेन विद्यमानाकाङ्क्षायाः शाब्दबोधे हेतुत्वादेव घटः कर्मत्वम् आनयनं कृतिरित्यतः अनियताकाङ्क्षायां घटकर्मकानयन-विषयिण्याः उत्थापकतासम्बन्धविशिष्टायाः वा विषयता-सम्बन्धविशिष्टायाः वा तदुभयसम्बन्धविशिष्टायाः वा नियताकाङ्क्षायाः अभावात् नान्वयबोधः। घटम् आनय इति सुबन्ततिङन्तयोः अर्थयोः एव आकाङ्क्षत्वम् इत्यादिरूपेण आचार्येण नागेशभट्टेन आकाङ्क्षा निरूपिता दृश्यते परमलघुमञ्जूषायाम्। एवम् आचार्येण शाब्दबोधे सहकारिकारणरूपेण आकाङ्क्षा आवश्यकी इति वैयाकरणानां परमसिद्धान्तभूतं मतं प्रदर्शितम्।

**योग्यता**

अत्र प्रथमं स्वसिद्धान्तं प्रदर्शयति आचार्यः यथा "योग्यता च परस्परान्वयप्रयोजक- धर्मवत्वम्"[5] इति। योग्यस्य भावः योग्यता। परस्परम् अन्वयजनकभावेन विद्यमानेन धर्मेण सह प्रवर्तनमेव योग्यता। अतः पयसा सिञ्चति इति वाक्यं शुद्धमिति आचार्यस्य मतम्। कारणं तु सेकस्य धारारूपत्वात् जले च तद्विद्यते इति हेतोः जले सेकान्वयप्रयोजकद्रवद्रव्यत्वं योग्यता अस्ति। तथा सिञ्चति इति सेकक्रियायां कारणत्वेन जलान्वयप्रयोजकार्द्रीकरणत्वं योग्यता च अस्ति। अतः एव "वह्निना सिञ्चति' इति वाक्यमयोग्यं, वह्नेः सेकान्वयप्रयोजकद्रवद्रव्यत्वाभावात्। एतादृशस्थलेषु नान्वयबोधः। किन्तु "प्रत्येकं पदार्थबोधमात्रमिति"[6] नैयायिकमतस्य खण्डनाय उच्यते "तन्न। बौद्धार्थस्यैव सर्वत्र बोधविषयत्वेन बाधस्याभावात्"[7] इति। अर्थात् बुद्धिस्थस्य पदार्थस्य एव सर्वत्र विशिष्टपदार्थबोधविषयत्वेन यत्र कुत्रापि बोधस्याभावात् इति। बुद्धिस्थः पदार्थः एव सर्वत्र बोधविषयः भवति। अत एव लौकिकार्थरहितानां वन्ध्यासुतादीनां बौद्धिकार्थयुक्तानां शब्दानाम् अर्थवत्वे "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्"[8] इत्यनेन प्रातिपदिकत्वम्। एवं वह्निना सिञ्चति इति श्रवणमात्रेणैव अद्रवेण वह्निना कथं सिञ्चति इति बोधोत्पत्तौ एव प्रयोक्तारं प्रति परिहासस्य उत्पत्तिः सम्भवति। नो चेत् उपहासस्य अनुत्पत्तिश्च। किन्तु लोके तादृशस्य उपहासस्य दर्शनात् तत्तद्वाक्यानां बोधोत्पादनशक्तिरस्ति इत्यतः योग्यता न आवश्यकी इति वैयाकरणमतरूपेण आचार्यस्य नागेशभट्टस्य मतं विलसति।

**आसत्तिः**

अन्वययोग्यानां पदानां पूवोत्तरसम्बन्धेन उच्चारणं भवति आसत्तिः। अथवा प्रकृतान्वयायोग्यस्य पदस्य प्रयोगभावः आसत्तिरिति। उक्तं च आचार्येण "प्रकृतान्वयबोधाननुकूलपदाव्यवधानम् आसत्तिः"[9] इति।

अर्थात् प्रस्तुतस्य अन्वयबोधस्य अजनकानां पदान्तराणां व्यवधानस्य अभावः भवति आसत्तिः। गिरिः अग्निमान्, गिरिर्भुक्तमग्निमान् देवदत्तेन इत्यादिषु उदाहरणेषु यथा गिरिरग्निमान् इत्यादयः आसत्तिमत् भवन्ति तथा गिरिर्भुक्तमग्निमान् देवदत्तेन इत्यादिषु गिरिरग्निमत् पदयोः मध्ये विद्यमानेन भुक्तम् इति पदेन व्यवधाने प्रकृतान्वयबोधाभावे आसत्तिरहितं च भवति। एवं यत्र प्रकृतान्वयबोधानुकूलपदानाम् आसत्तिः तत्र अव्युत्पन्नानां शीघ्रेण शाब्दबोधः। अतः तेषां शाब्दबोधे एव अस्याः कारणत्वम्। तथापि व्युत्पन्नस्य तु आसत्तेः अभावे अपि पदार्थस्य उपस्थितौ आकाङ्क्षातात्पर्याभ्यां वेगेन बोधः भवति इत्यतः शब्दबोधे तस्याः आसत्तेः न कारणत्वम् इति भाष्यकारादीनां मतानुवर्तित्वेन मार्गेण आचार्येण स्वमतम् उपस्थाप्यते। कारणं तु स्थाल्यामोदनं पचति इत्यादौ स्थाल्यामित्यस्य ओदनपदेन व्यवधाने सति प्रकृतान्वयबोधानुकूलत्वात् आसत्यभावः न प्रतिवन्धः शाब्दबोधे इति। एवं शाब्दबोधाय आसत्तिरपि नावश्यकी इत्यस्य वैयाकरणमतस्य उपस्थापनमत्र आचार्येण कृतम्।

**तात्पर्यम्**

"एतद्वाक्यं पदं वा एतदर्थबोधायोच्चारणीयमितीश्वरेच्छा तात्पर्यम्।"[10] अत्र ईश्वरशब्दं तु शिष्टप्रयोगमात्रे अर्थे। अथवा पाणिन्यादिभिः ऋषिवर्यैः उक्तेषु टि, घु इत्यादि सङ्केतेषु ईश्वरेच्छायाः अभावात् बोधो न स्यात्। एवं एतद्वाक्यं वा पदं वा अस्य अर्थस्य बोधनाय उच्चार्यते इति वक्तुः इच्छा एव तात्पर्यम्। अत एव सति तात्पर्ये "सर्वे सर्वार्थवाचकाः" इति शाब्दिकनये अपि शाब्दबोधं प्रति वक्तृतात्पर्यनिश्चयस्य हेतुत्वादेव घट इति कम्बुग्रीवादिमत्पदार्थबोधाय इति मत्वा तस्मात् घटशब्दात् पटप्रत्ययः न जायते। एवं श्रोत्रग्रहणविषयकः वक्तुः इच्छा एव तात्पर्यमित्यर्थलाभः। तथा हरिः, पयः, सैन्धवम् इत्यादिषु प्रयुक्तेषु नानार्थकशब्देषु पदमिदम् एतदर्थप्रत्यभिज्ञानाय इति प्रयोक्तुः या अर्थविषयिणी इच्छा सा एव तात्पर्यम्। एवं विद्यमानस्य तात्पर्यस्य नियामकत्वेन संयोगविप्रयोगादयः प्रकरणादिः एव शरणम्। एवं प्रकरणादीनां तात्पर्यनियामकत्वादेव सैन्धवमानय इत्युक्ते भोजनप्रकरणे लवणम् इति बोधः तथा युद्धावसरेषु अश्वः इति बोधः च जायते। प्रकरणाभावे तु पदमिदं कस्मिन्नर्थे इति संशयश्च।

अत्र शक्त्या एव निर्वाहः सम्भवति तात्पर्यमपि नावश्यकम् इति पूर्वपक्षस्य अभिप्रायः। करणं तु भर्तृहरिणा "संयोगो विप्रयोगश्च" इति कारिकायां संयोगादीनां शक्तिनियामकत्वमुक्तत्वात्, तथा अत्र तात्पर्यनियामकत्वमपि तेषां संयोगादीनामेवोक्तम् इत्यतः च। अत्र उच्यते आचार्येण नागेशभट्टेन "अस्माच्छब्दादर्थद्वयविशोष्यको बोधो जायते"[11] इत्यादिना। अर्थात् पय आनय इत्यादि स्थलेषु पयशब्दात् जलं क्षीरम् इति अर्थद्वयविशोष्यकबोधे अस्य वक्तुः तात्पर्यं कस्मिन् अर्थे अस्ति इति सर्वजनानाम् अनुभावादेव इति सति अनुभवस्तु संयोगादिषु नान्तर्भवतीत्यतः शक्त्या निर्वाहासम्भवे तात्पर्यस्य उपयोगित्वम् अस्ति इति आचार्यस्य नागेशभट्टस्य अभिप्रायः।

**उपसंहारः**

अत्र शाब्दबोधे सहकारिकारणानि कानि इति विचारः एव अकरोत्। इह प्रतिपादितेषु आकाङ्क्षा, योग्यता, आसत्तिः, तात्पर्यम् इत्यदिषु चर्तुर्षु आकाङ्क्षायाः तात्पर्यस्य च एव शाब्दबोधे सहकारिभावेन नियामकत्वम् इति प्रतिपादयति परमलघुञ्जूषाकारः। एवं आचार्येण नागेशभट्टेन शब्दबोधे सहकारिकारणत्वेन आकाङ्क्षायाः तात्पर्यस्य च स्वीकारः एव कृतः इति ज्ञातुं शक्यते। अतः वैयाकरणानां परमसिद्धान्तरूपेण एतत् कारणद्वयमेव तिष्ठति इति निस्संशयं वक्तुं शक्यते।

**सूचनाः**

1. परमलघुमञ्जूषा-पृ-83
2. परमलघुमञ्जूषा- पृ-84
3. महाभाष्यम्-आह्निकम्-2, पादः-1, सूत्रम्-1
4. परमलघुमञ्जूषा-पृ-86
5. परमलघुमञ्जूषा-पृ-88
6. परमलघुमञ्जूषा-पृ-88
7. परमलघुमञ्जूषा-पृ-88
8. अष्टाध्यायी-सूत्रसंख्या-1-2-45
9. परमलघुमञ्जूषा-पृ-92
10. परमलघुमञ्जूषा-पृ-94
11. परमलघुमञ्जूषा-पृ-94

**सहायकग्रन्थसूची**

1.अष्टाध्यायीसूत्रपाठः - सम्पादकः आचार्यः सत्यनारायणशास्त्री, चौखम्बा कृष्णादास् अकादमी, वाराणसी- 2001.

2.परमलघुमञ्जूषा (भावप्रकाशिका- बालबोधिनी व्याख्याद्वयोपेतम्) - श्री नागेशभट्टः, चौखम्बा कृष्णदास् अकादमी, वाराणसी- 2000.

3.व्याकरणमहाभाष्यम्-(प्रदीपोद्योतसमेतम्)-श्रीमद्भागवत्पतञ्जलिमुनिः, प्रतिभा प्रकाशन्, दिल्ली-1999.

4.वैयाकरणभूषणसारः (कमलव्याख्या) - श्री कौण्डभट्टः, चौखम्बा कृष्णदास् अकादमी, वाराणसी-2011.

5.वाक्यपदीयम् (भावप्रदीपव्याख्या) - श्री भर्तृहरिः, चौखम्भा संस्कृतसंस्थानम्, वाराणसी- 2008.